॥ इति श्रीककारादिसहस्रनामप्रारंभः ॥

1.

ककाः
॥१॥

॥श्रीगणेशाय नमः॥श्रीमहाकाल्यै नमः॥शैलेंद्रस्वर्णशृंगे त्रिदशपरि
वृतासिंहपृष्ठांबुजस्थामेघश्यामात्रिनेत्राशवहृदि शशभृद्रक्तभूषां
गरागा॥दोर्भिः शंखवारिबाणान्मणिचषकमयि स्कंधदेशे वहंती चापं
चर्मासिघंटां मणिमयरसनां कालि कामदास्तु॥१॥इति ध्यात्वाष्टो
त्तरशतनामभिः पूजयेत्॥श्रीमदनुरुद्धसरस्वत्यै नमः॥कलाक
लावती कर्त्री कमनीया कुलेश्वरी॥कपर्दिनी कमलिनी कमला कमला
लया॥कपालिनी कपालांगी कपालकरभूषणा॥कपालमालिका
कन्या कदंबवनचारिणी॥कल्या कल्यांगरागा॥कल्याणी कल्पिता
र्थदा॥कल्पना कल्पवल्ली च कस्तूरीतलक्ष्मलक्षिता॥कबंधकर्णा
कपिला करालास्या करालिनी॥३॥कामदा कामिनी कांता कामाक्षी

व्या
१

३ कामसुंदरी॥ कामधुंकामिनीकांताकालिंदीकालभैरवी॥ ४॥ कात्याय
नीकालरात्रीकालज्ञाकालकर्णिका॥ कृपाफलाकिशोरीचकरिवक्त्रा
गत्राकिरीटिनी॥ कालिकाकालिहस्ताचकीर्त्तिभूः कीर्त्तनप्रिया॥ कुंडो
दरीकुंडलिनीकुरुकुल्लाकुजार्च्चिता॥ ६॥ कुलालीकुलिशांगीकुः कुटि
लालका॥ कुलदेवीकुलेशानीकुलीनाकुलपालिनी॥ ७॥ कुलमाता
कुलोद्भूताकुलशक्तिः कुलव्रता॥ कुंकुमांगीः कुहूः कुंदप्रभाकुंजर
गामिनी॥ ८॥ कुसुंभवस्त्राकुसुममालि[illegible]कुसुमायुधा॥ कूष्मांडीका
कूर्मपृष्ठाचक्रूरघ्नीक्रूरकर्मिणी॥ ९॥ कृष्णांगीकृष्ण[illegible]वसनाकृ
ष्णाकृष्णांगभूषणा॥ कृतज्ञाकृत्तिनीकृत्याकृपाकुहृदयाकृपा॥ १०॥

कुटिला

2

कृशोदरी कृशांगी च कृपणा कुलसंगरा ॥ कैवर्तीकैरिणीकेकी प्रियाकैट
भमर्द्दिनी ॥ ९९ ॥ कैलासवासिनी क्रोधविग्रहानुग्रहात्मिका ॥ कौमा
रीकेलिकीकांतिः कौशिकी कोशिकार्चिता ॥ कंजाक्षी कंबुकंठा च कंटकी
कंटकार्दिनी ॥ एषां नाम्नां कालिऋषिः अनुष्टुप्छंदः ॥ जगन्मंगलदा
यिनी कालिका देवता ॥ ह्रीं हूं हूं फट् नमः इति सर्वांगे ॥ क्रौं षडंगः क्रौं क्रौं इति

क्रौं

लेइ स्वर्गश्रृंगइति ध्यात्वाष्टोत्तरशतनामानिपठित्वा सहस्रनामपठे
दित्युक्तं कुलाचारचंद्रोदये ॥ श्रीगजाननो विजयते ॥ कैलासशिख
रे रम्ये नानादेवगणावृते ॥ नानावृक्षलताकीर्णे नानापक्षिरवैर्युते ॥
॥ १ ॥ चतुर्मंडलसंयुक्ते श्रृंगारमंडपे स्थितं ॥ समाधौ संस्थितं शांतं
क्रीडंतं योगिनीप्रियं ॥ तत्र मौनधरं दृष्ट्वा देवी पृच्छति शंकरं ॥ देव्युवाच २

किं त्वयाजप्यते नाथ किं त्वया स्मर्यते सदा॥ सृष्टिः पुत्रवितो नास्ति पुनः कुत्र प्रजायते॥ ब्रह्मांडकारणं किं तत् किमाद्यं कारणं महत्॥
मनोरथमयी सिद्धि स्तथा वांछामयी शिव॥ तृतीया कल्पना सिद्धिः कोटि सिद्धीश्वरत्वकं॥ शक्तिपाताष्ट दर्शकं चराचरपुरीगतिः॥ महेंद्रजालमिंद्रादि जालानां रचना तथा॥ अणिमा रवेचरत्वं च परकायप्रवेशनं॥ नवीनसृष्टिकरणं समुद्रस्य च शोषणं॥ अमायां चंद्रसंदर्शो दिवा चंद्रप्रकाशनं॥ चंद्राष्टकं चाष्टदिक्षु तथा सूर्याष्टकं शिव॥ ८॥ जले जलेमयत्वं च वह्नौ वह्निमयत्वकं॥ ब्रह्मविं[illegible]दि निर्माणमिंद्राणां करणं करे॥ पादुका गुटिका खड्ग वेताल पंचकं तथा॥ रसायनं तथा गुप्तिः स्तथैव च बिलं

३

ण्वा

ककाः
२

जनं ॥ महामधुमती सिद्धिर्यविंस्यः संति सिद्धयः ॥ केन मंत्रेण तपसा
कलौ पापसमाकुले ॥ आयुष्यपुण्यरहिते कथं भवति तद्वद ॥ द ॥ श्रीशिव उ० २
विना मंत्रं विना स्तोत्रं विनैव तपसा प्रिये ॥ १२ ॥ विना ध्यानं विना यं
त्रं विना पुजादिना प्रिये ॥ विना बलिं विनान्यासं भूतशुद्धिं विना प्रि
ये ॥ १३ ॥ विना क्लेशादिभिर्देविदेहदुःखादिभिर्विना ॥ सिद्धिराशुभ
वेद्येन तद्देव कथ्यते मया ॥ अन्येब्रह्मांड गोले तु पंचाशच्छून्य
मध्यगे ॥ पंचशून्ये स्थिता तारा सर्वांते कालिका स्थिता ॥ अनं
तकोटि ब्रह्मांड राजदंताग्रके शिवे ॥ स्थाप्य शून्यालयं कृत्वा कृ
ष्णावर्णं विधाय च ॥ महानिर्गुणरूपा तु वाच्यातीता परा कला ॥ क्री
ड्या शून्यरूपं तु भर्त्तारं तु प्रकल्पयेत् ॥ सृष्टेरारंभकार्यार्थं छा

२

याहृष्टा तया तदा॥ इच्छाशक्तिस्तु सा जाता तया कालेन निर्मितः। प्रति
बिंबं तत्र दृष्टं जाता ज्ञानाभिधा तु सा॥ इदं मे तत् किं विशिष्टं ज्ञानं वि
ज्ञानकं यदा॥ तदा क्रियाभिधा जाता तदिच्छातो महेश्वरि॥ ब्रह्मां
डगोलं देवेशि राजदंतस्थितं तु यत्॥ सा क्रिया स्थापयामास स्व
स्वस्थानक्रमेण च॥ तत्रैव स्वेच्छया देवि सामरस्यपरायणा॥ तदि
च्छा कथ्यते देवि यथावदवधारय॥ युगादिसमये देवि शिवं परगुणो
त्तरं॥ ८ तदिच्छा निर्गुणं शांतं सच्चिदानंदविग्रहं॥ शाश्वतं सुंदरं स्व
च्छं सर्वदेवयुतं परं॥ आदिनाथं गुणातीतं कात्यासंयुतमीश्वरं॥ दि
परीतरतं देवं सामरस्यपरायणं॥ पूजार्थमागता न देवा गंधर्वा न

सूका
४

सरसां गणान्॥ यक्षिणी किन्नरी कन्या गुर्वश्या द्यां तिलोत्तमा॥ वीक्ष्य तन्मा यया प्रहसुंदरी प्राणवल्लभे॥ त्रैलोक्यसुंदरि प्राणस्वामिनी प्राणरंजिनि॥ किमागतं भवत्याद्य मम भाग्यार्णवो महान्॥ उत्क्रामोन्नधरं शंभुं पूजयंत्यप्सरोगणाः॥२७॥ अप्स[illegible]तु॥ सं रस३॥ ५ तं हारात्तारिंद्विव त्वया विभ्वजनप्रिय॥ सृष्टेरारंभकार्यार्थमुद्युक्तोसि महाप्रभो॥ वेश्याकृत्यमिदं देव मंगलार्थं प्रगायनं॥ प्रयाणोत्सवे काले तु समारंभे प्रगायनं॥ २९॥ युगाद्यारंभकालेहि वर्तते मृडशंकर॥ इंद्राणी कोटयः संति तस्याः प्रस्त्रवबिंदुतः॥३०॥ ब्रह्माणी वैष्णवीनां च माहेशी कोटिकोटयः॥ तवस्यामरसानंददर्शनार्थं सि ४

मुत्सुका॥ संजाताश्चागतादेव चास्माकं सौख्यसागर॥ रै...हि त्रिं

ताकामिनीनांनान्यत्सौख्यं महेश्वर॥ सारलि दृश्यते स्मात्सिमा

हासौख्यार्थकारिका॥ एवमेव तु चास्माभिः कर्त्तव्यं भर्तृभिः सह॥

एवं श्रुत्वा महादेवो ध्यानावस्थितमानसः॥ ध्यानं हित्वा मायया तु

प्रोवाच कालिकां प्रति॥ कालि कालि करं उपालिप्रिये भैरवनादि

नी॥ शिवारूप धरे क्रूरे घोरदंष्ट्रे भयानके॥ त्रैलोक्यभक्षणक

रि सौंदर्यः संतितेमतः॥ सुंदरीवीक्षणं कर्म कार्यं कालप्रियो शि

वे॥ ध्यानं मुंच महादेवि ताम छंति गृहं प्रति॥ लवरूपं महाकालि

माताकालप्रियंकरं॥ एतासां ... रूपं त्रैलोक्यप्रियकारकं॥

5

भूताका
लि

५ एवंमायाभ्रमाविष्टोमहाकालोवदंन्निति॥ इत्थंकालवचः श्रुत्वाका
स्तु२ लंप्राह चकालिका॥ कौप्युवाच॥ मायया चाद्य चास्मानं निजस्त्रीरू
पधारिणी॥ इतः प्रभृति स्त्री मात्रं भविष्यति युगेयुगे॥ वल्याद्यौष
धयो देवद्दिवावल्लिस्वरूपतां॥ रात्रौस्त्रीरूपमासाद्य क्रीडंति च प
रस्परं॥ अज्ञानंचैव सर्वेषां भविष्यति युगेयुगे॥ एवं शापं प्रदत्वा
तु पुनः प्रोवाच कालिका॥ ४९॥ विपरीतरतिंकृत्वाचिंतयंतिभजं
ति ये॥ तेषांवरं प्रदास्यामि तत्रनित्यंवसाम्यहं॥ इत्युक्त्वाकालि
का विद्यातत्रैवांतरधीयत॥ त्रिंशत्त्रिखर्वषट्‌द्वंद्वनवत्यर्बुदकोटयः
दर्शनार्थं तपस्तेपे सावै कुत्रगताप्रिया॥ मम प्राणप्रियादेवि हा हा ५

प्राणप्रियामम॥४४॥किंकरोमिक्कगच्छामिइत्येवंभ्रमसंकुलः॥त
दाकाल्याःकृपाजातामम्चिंतापरःशिवः॥यंत्रप्रस्तारबुद्धिस्तु
काल्यादत्तातिसत्वरं॥यंत्रंजातंतदारभ्यपूर्वविद्वन्गोचरं॥श्री
चक्रराजप्रस्तारस्चनाभ्यासलसरः॥इतस्ततोभ्राम्यमाणस्त्रैलो
क्यंचक्रमध्यगं॥चक्रपारदर्शनार्थंकोट्यर्बुदयुगंगतं॥भक्तप्रा
णप्रियादेवीमाहाश्रीचक्रनायिका॥४८॥तत्रबिंदौपरंरूपंसुंदरंसु
मनोहरं॥रूपज्ञातंमहेशानिजगत्त्रिपुरसुंदरी॥४९॥रूपंद
ष्ट्वामहादेवोराजराजेश्वरोह्यभूत्॥तस्याःकटाक्षमात्रेण
तस्यारूपधरःशिवः॥५०॥विनाश्रृंगाररसंयुक्तात्तदाजाता

वी

6

कको
६५

महेश्वरी॥ विना कालांशतो देवि जगत्स्थावरजंगमं॥ नश्यं गातोन

रा क्तित्वं क्वापि नास्ति महेश्वरि॥ सुंदर्या प्रार्थिताकाली तुष्टा भ्रा वा

च कालिका॥५२॥ कालुवाच॥ सर्वेषां नेत्रकेशेषु ममांशोत्र

भविष्यति॥ पूर्ववस्था तु देवेशि ममांशास्तिष्ठति प्रिये॥५३॥

सावस्था तरुणोरव्या तु तदंते नैव तिष्ठति॥ मद्भक्तानां महेशानि

सदा तिष्ठति निश्चयः॥ शक्तिस्तु कुंठिता जाता तथा रूपं न सुंद

रं॥ चिंताविष्टाति मलिना जाता तत्र तु सुंदरी॥५५॥ क्षणं

स्थित्वा ध्यानपरा काली चिंतनतत्परा॥ तदा काली प्रसन्नाभू

त्॥ क्षणार्द्धेन महेश्वरि॥ कालुवा॥ वरं ब्रूहि वरं ब्रूहि वरं ब्रूही

६

तिसादरं ॥ सुंदर्युवाच ॥ ममशक्तिंपरांदेहि वरोयंप्रार्थ्यतेमया ॥
ताहृगुपायंकथययेनशक्तिर्भविष्यति ॥ कालुवाच ॥ ममनाम
सहस्त्रंच मया पूर्वंविनिर्मितं ॥ ५८ ॥ मत्स्वरूपं ककाराख्यं मा
हम्साम्राज्यदायकं ॥ वरदानाभिधंनामक्षणार्धाहृद्दायकं नामस
तत्पठस्वमाहामायेतवशक्तिर्भविष्यति ॥ ततः प्रभृतिश्रीवि
म द्यातन्नोपठं समरा ॥ ६० ॥ तदैवनाम साहस्त्रं सुंदरीशक्ति
स० दायकं ॥ कथ्यतेपरया ॥ यत्स्यासाधयस्त्वमहेश्वरि ॥ मद्ये
7 र्मांसैस्तथामुद्रैः सर्वराजैरपि प्रिये ॥ तर्पयेत्पूजयेत्
कालीं विपरीतरतिंचरेत् ॥ विपरीतरतौदेविकालीतिष्ट

का
शु॰ तिनि स्वधा॥ माध्वीकपुष्पांबुमैथुनानुरागिणी। वैष्णवी व्यापिकाविद्याश्मशानवासिनी परा॥ वीरसाधनसंतुष्टा वीणास्फालनेनादिनी॥ शिवावलिप्रहृष्टास्या शिवरूपा च चंडिका॥ कामानंदपरास्तोत्रत्रियाकुलकमानसा॥ ब्रह्मानंदपरासांद्रमैथुनानंदतोषिणी॥ योगींद्रहृदयागारादिवानिशिविपर्यया॥६५
विपरीतादिवानिशि विपरीतारतातुरा॥ क्षणंतुष्टा च प्रत्यक्षा दंतमालाजपप्रिया॥ खड्गहस्तो मुक्तकेशो दिशांबरविभूषितः॥ शय्यास्थोऽङ्कुं बनानेही वेश्यासंगपरायणः॥ पठेत्सैस्त्र नामाख्यं मेधासाम्राज्यनायकं॥ यथा दिव्यामृतैर्दिव्याप्रसं

१५

त्राक्षणमात्रतः॥ तथांतेब माहाकालीप्रसन्नापाठमात्रतः॥ क
थ्यते नाम साहस्त्रं सावधान मनाः श्रृणु॥ सर्वसाम्राज्यमेधाख्यना
म साहस्त्रकस्यच॥ महाकाल ऋषिः प्रोक्तो उष्णिक्छंदः प्रकी
र्तितं॥ देवतादक्षिणाकाली मायाबीजं प्रकीर्तितं॥ हूं शक्तिः का
लिकाबीजं कीलकं परिकीर्तितं॥ कालिकादर्शनार्थे विनियो
गः प्रकीर्तितः॥ कीलकेन षडंगानि षट्दीर्घाद्येन कारयेत्॥ ध्या
नं च पूर्ववत् कृत्वा साधयेत्स्वेष्ट साधनं॥ ७४॥ अस्यश्रीसर्व
साम्राज्यमेधाकालीरूप ककारात्मक सहस्त्रनाममंत्रस्य॥
माहाकालऋषिः॥ उष्णिक् छंदः॥ कालिकादेवता॥ ह्रीं बीजं

८

कश्या ४ मालाकलाकरा॥ कलौटिसमाभासाकला

को

हंशक्तिः॥ क्रींकिलकं॥ कालिकावरदाना घविलार्थेजपेविनि
योगः॥ ॐ क्रींकारी॥ क्रूं करालीच कल्याणी कमलाकला॥ कलाव
ती कलाब्याच कलापूज्याकलात्मिका॥ कलाहृष्टाकलापुष्टाक
लौ कोटिप्रपूजिता॥ ७६॥ कलामयीकलाधाराकलापा
राकलागमा॥ कलाधराकमलिनीककाराकरुणाकविः॥
ककारवर्णसर्वांगीकलाकोटीभूषिता॥ ककारकोटिगणि
ताककारकोटिभूषणा॥ ७८॥ ककारवर्णहृदयाकका
रमनुमंडिता॥ ककारवर्णमुकुटा ककाराबरभूषिता॥

क०११

ककवर्णरूपा ककशब्दपरायणा॥ ककवीरास्फाल

रता कमलाकरपूजिता॥ कमलाकरनाथा च कमलाकरक

पध्रकू॥ कमलाकरासिंधिस्था कमलाकरपारदा॥ कमला

करमध्यस्था कमलाकरतोषिता॥ कथंकारपदालापा कथं

कारपरायणा॥ कथंकारपदांतस्था कथंकारपदार्थभूः॥ क

मलाक्षीकमलजा कमलाक्षप्रपूजिता॥ कमलाक्षवरो

द्धर्त्री ककाराकर्बुराक्षरा॥ करतारा करच्छिन्ना करश्यामा

करार्णवा॥ करपूज्या कररता करदा करपूजिता॥ करतो

९

क।

१ याकरामर्शाकर्मनाशा।करप्रिया॥करप्राणा करकञ्जा॥ करकाक
रकांतरा॥करकाचलरूपाच करकाचल शोभिनी॥ करकाच
लपुत्रीच करकाचलतोषिता॥ करकाचल गेहस्था करका
चल [illegible] रक्षिणी॥ करकाचलसम्मान्या करकाचल [illegible]
कारिणी॥ करकाचलवर्षाढ्या करकाचल रंजिता॥ करकाच
लकांतारा करकाचलमालिनी॥ करकाचलभोज्याच करका
चलरूपिणी॥ करामलकसंस्थाच करामलकसिद्धिदा॥क
रामलकसंपूज्या करामलकैरोचनी॥ करामलकमाता
चकरामलकसेविनी॥ करामलकवद्ध्येया करामलकदा १
१तारिणी॥१०॥करामलकका[illegible] चकरामलक

ही

चिनी॥ कंजनेत्रा कंजगतिः कंजस्था कंजधारिणी॥ कंजमालाप्रि
यकरी कंजरूपा च कंजजा॥ कंजयोतिः कंजगतिः कंजहोमप
रायणा॥ कंजमंडलमध्यस्था कंजाभरणभूषिता॥ कंजसं
मानिरता कंजोत्पत्तिपरायणा॥ कंजराशिसमाकारा कंजा
ध्य रण्यनिवासिनी॥ करंजवृक्षमध्यस्था करंजवृक्षवासिनी॥ करं
ज[illegible]भूषाढ्या करंजारण्यवासिनी॥ करंजमालाभरणा
करवालपरायणा॥ करवालप्रहृष्टात्मा करवालप्रियागति॥
करवालप्रिया कंथा करवालप्रहारिणी॥ करवाल

मयीकर्मा करवालक्रियाकरा॥ कबंधमालाभरणा कबंधराशि
मध्यगा॥ कबंधकूटसंस्थाना कबंधानंतभूषणा॥ कबंधनाद
संतुष्टा कबंधासनधारिणी॥ कबंधगृहमध्यस्था कबंधव
नवासिनी॥ कबंधकांचीकरणी कबंधराशिभूषणा॥ कबंध
मालाजयदा कबंधदेहवासिनी॥ कबंधासनमान्या च कपा
लमाल्यधारिणी॥ कपालमालामध्यस्था कपालव्रततोषि
ता॥ कपालदीपसंतुष्टा कपालदीपरूपिणी॥ कपाल
दीपवरदा कपालकज्जलस्थिता॥ कपालमालाजयदा कपा

त्लजपतोषिणी॥ कपालसिद्धिसंहृष्टा कपालभोजनोद्यता॥
कपालव्रतसंस्थाना कपालकमलालया॥ कविद्यामृतसा
राच कविद्यामृतसागरा॥ कवित्वसिद्धिसंहृष्टा कवित्वादानका
रिणी॥ कविपूज्या कविगतिः कविरूपा कविप्रिया॥ कविब्रह्मा
५८ नंदरूपा कवित्वां ततोषिता॥ कविमानससंस्थाना कविवां
छाप्रपूरिणी॥ कविकंठस्थिता कंह्रींकंकंकविपूर्तिदा॥
कज्जला कज्जलादानमानसा कज्जलप्रिया॥ कपालकज्जल
समा कज्जलेशप्रपूजिता॥ कज्जलार्णवमध्यस्था कज्जलानं

कक

२२

तरूपिणी॥ कज्जलप्रियसंतुष्टा कज्जलप्रियतोषिणी॥ कपालमा
लाभरणा कपालकरभूषणा॥ ११० ॥ कपालकरभूषाढ्या कपा
लचक्रमंडिता॥ कपालकोटिनिलया कपालदुर्गकारिणी॥ कपा
लगिरिसंस्थाना कपालाचलवासिनी॥ कपालपात्रसंतुष्टा कपा
लार्घ्यपरायणा॥ कपालार्घ्यप्रियप्राणा कपालार्घ्यकरोद्यता॥ ला ५
कपालचक्ररूपा च कपालरूपमात्रगा॥ कदली कदलीरूपा क
दलीवनवासिनी॥ कदलीपुष्पसंप्रीता कदलीफलमानसा॥ ११
कदलीहोमसंतुष्टा कदलीदर्शनोद्यता॥ कदलीगर्भमध्यस्था
कदलीवनसुंदरी॥ कदंबपुष्पनिलया कदंबवनमध्यगा॥ क

दंबकुसुमामोदाकदंबवनतोषिणी॥ कदंबपुष्पसंपूज्याकदंब
पुष्पहोमदा॥ कदंबपुष्पमध्यस्थाकदंबफलभोजिनी॥ कदं
बकाननांतस्थाकदंबाचलवासिनी॥ कछपाकछपाराध्याक
छपासनसंस्थिता॥ कर्णपूराकर्णनासा. कर्णाढ्याकालभैरवी॥
कलप्रीताकलहदाकलताकलहांतरा॥ कर्णयक्षीकर्ण
वार्त्ताकथनीकर्णसुंदरी॥ कर्णपिशाचिनीकर्णमंजारिकपि
कछदा॥ १२०॥ कपिकछविरूपाढ्याकपिकछस्वरूपिणी॥
कस्तूरिमृगसंस्थानाकस्तूरिमृगरूपिणी॥ कस्तूरिमृगसं

12

तोषा कस्तूरी मृगमध्यगा॥ कस्तूरी सलीलांगी कस्तूरी गंधतोषि ता॥ कस्तूरी पूजकप्राणा कस्तूरी पूजकप्रिया॥ कस्तूरी प्रेमसं तुष्टा कस्तूरी प्रेमधारिणी॥ कस्तूरी पूजकानंदा कस्तूरी गंध रूपिणी॥ कस्तूरी मालिकारूपा कस्तूरी भोजनप्रिया॥ कस्तूरी तिलकानंदा कस्तूरी तिलकप्रिया॥ कस्तूरी होमसंतुष्टा क स्तूरी तर्पणोद्यता॥ कस्तूरी मार्जनोद्युक्ता कस्तूरी चक्रपूजि ता॥ कस्तूरी पुष्पसंपूज्या कस्तूरी चर्वणोद्यता॥ कस्तूरी गर्भ मध्यस्था कस्तूरी वस्त्रधारिणी॥ कस्तूरी कामोदरता कस्तूरी

वनवासिनी॥ कस्तूरीवनसंरक्षा कस्तूरीप्रेमधारिणी॥ कस्तूरीश
क्तिनिलया कस्तूरीशक्तिकुंडगा॥ कस्तूरीकुंडसंस्थाना॥ कस्तूरी
कुंडमज्जना॥ कस्तू[illegible]र्घ्यसंतुष्टा कस्तूरीजीवधारिणी॥ कस्तू
रीपरमामोदा कस्तूरीजीवनक्षमा॥ कस्तूरीजातिभावस्था कस्तू
रीगंधचुंबना॥ १२०॥ कस्तूरीगंधसंशोभिविराजितकपालभूः॥
कस्तूरीमदनांतस्था कस्तूरीमदहर्षदा॥ कस्तूरीकवितान[illegible]ढ्या
कस्तूरीमृगमध्यगा॥ कस्तूरीस्पर्शकप्राणा कस्तूरीनिंदकांतका॥ कस्तू[illegible]र्यामोदरसिका कस्तूरीक्रीडनोद्यता॥ कस्तूरी

13

क ४ कह पूज्या कहेसा ख्या कहहेषा कलासिका॥ ४

दान निरता कस्तूरीवरदायिनी॥ ३३॥ कस्तूरीस्थापनासक्ता कस्तूरी
स्थानरंजिनी॥ कस्तूरीकुशलप्रश्ना कस्तूरीस्तुतिवंदिता॥ कस्तूरीवं
दकाधारा कस्तूरीस्थानवासिनी॥ कहरूपा कहाख्याव कहानंदा कहा
त्मभूः॥ कहमाला कंठभूषा कहमंत्रजपोद्यता॥ कहनामस्मृतिप
रा कहनामपरायणा॥ कहपारायणपरा कहदेवीमहेश्वरी॥ कह
हेतुः कहानंदा कहनादपरायणा॥ कहमाता कहांतस्था कहमं
त्रा कहत्वरा॥ कहगेहा कहाराध्या कहध्यानपरायणा॥ कहतं
त्रा कह कहा कहचर्यापरायणा॥ कहाचारा कहगतिः कहतांडव
कारिणी॥ कहारण्या कहमतिः कहशक्तिपरायणा॥ कहराज्य

ता कर्मसाक्षिणी कर्मसुंदरी ॥ कर्मविद्या कर्मगतिः कर्मतंत्रपरायणा ॥
कर्ममात्रा कर्मगात्रा कर्मधर्मपरायणा ॥ कर्मरेखा नाशकर्त्री कर्मरे
खाविनोदिनी ॥ कर्मरेखामोहकरी कर्मकीर्तिपरायणा ॥ कर्मवि
४ रा द्याकर्मसारा कर्मधारा च कर्मभूः ॥ कर्मकारी कर्महारी कर्मकौतु
कसुंदरी ॥ कर्मकाली कर्मतारा कर्मछिन्ना च कर्मदा ॥ कर्मचां
डालिनी कर्मवेदमाता च कर्मभूः ॥ कर्मकांडरतानंता कर्मका
१४ डानुमानिता ॥ कर्मकांडपरीणाहा कर्मठी कमठाकृतिः ॥ क
र्मठाराध्यहृदया कर्मठा कंठसुंदरी ॥ कमठासनसंसेव्या
कमठी कर्मतत्परा ॥ करुणाकरकांता च करुणाकरवंदिता ॥

क.का.

२४ कठोराकरमालाच क[illegible]ठोरकुचधारिणी॥ कपर्दिनी
कपटिनी कटिनी कं कभूषणा॥ करभोरूः कटिनदा करभाकर
मालया॥ करभाषामयी कल्याकल्पनाकल्पदायिनी॥ क
मलस्था कला माला कमलास्या कणप्रभा॥ ककुद्मिनी कष्ट
वृत्ता कच्छा कच्छार्चिता कचा॥५०॥ कचार्चिता कचतनुः कचसु
चे६ दरधारिणी॥ कठोरकु[illegible] संलग्ना कटिसूत्रविराजिता॥५१॥
कणभक्षप्रिया कंदा कथा कंदगतिः कलिः॥ कलिघ्नी कलिदू
तीच कविनायक[illegible]जिता॥ कशाकक्षा नियंत्री च काश्चित्कवि २४
वरार्चिता॥ कर्त्री च कर्णिकाभूषा कारणी[illegible] कर्णशत्रुपा॥

कृ०मा० ९

कहृणोश्रीकश्यपाक ... बा कलानिधिः॥ कलदा कलनाधा
कार राकतिँकारकाक र॥ कलगेयाकर्कराशिः कर्कराशिप्रपूजिता८
कन्याराशिः कन्यकाच कन्यकाप्रियभाषिणी॥ कन्यकादानसं
तुष्टाकन्यादानप्रतोषिणी॥ कन्यादानकरा नंदाकन्यादान
गृहेष्टदा॥ कर्षणाकक्षदहनाकमिताकमलासना॥ करमा
लानंदकत्रीकरमालाप्रतोषिता॥ करमालाशयानंदाकरमा
लासमागमा॥ करमालासिद्धिदात्रीकरमाला करप्रिया॥ करप्रि
याकररताकरदानपरायणा॥ कलानंदीकलि गतिःकलिहृ
ज्याकलिप्रसूः॥ कलनादनिनादस्थाकहोलाचकहोलदा॥ करै

१कलनादवरप्रदा॥ कलनादसमाजस्था॥

२ मा

ल गेहमध्यस्था कहोलवरदायिनी॥ कहोलकविताधारा ॥ क
होलऋषिमानिता॥ कहोलमानसाराध्या कहोलवाक्यकारिणी॥
कर्तृरूपा कर्तृमयी कर्तृमाता च कर्त्तरी॥ १६७॥ कनीया कनका
राध्या कनीनकमयी कथा॥ कनीयानंदनिलया कनकानंद
तोषिणी॥ कनीनककरा कष्टा कथार्णवकरी करिः॥ करिगम्या
करिगतिः करिध्वजपरायणा॥ करिनाथप्रिया कंठा कथानकप्र
तोषिता॥ कमनीया कमनका कमनीयविभूषणा॥ कमनीयस
माजस्था कमनीयव्रतप्रिया॥ कमनीयगुणाराध्या कपिला क
पिलेश्वरी॥ कपिलाराध्यहृदया कपिलाप्रियवादिनी॥ क ए
ई ल ह्रीं स्वरूपा च क ए ई ल ह्रीं वरप्रदा॥ क ए ई ल ह्रीं सिद्धिदा

३१

त्री कह्लह्रींस्वरूपिणी॥ कॅल्ह्रींमंत्रवर्णा क्लह्रीं प्रसूकला॥

कवर्गाच कपाटस्था कपाटोद्घाटनक्षमा॥ कंकाली च कपालीच

कंकालप्रियभाषिणी॥ कंकालभैरवाराध्या कंकालमानसस्थि

ता॥ कंकालमोहनिरता कंकालमोहदायिनी॥ कलुषघ्नी कलु

षहा कलुषार्त्तिविनाशिनी॥ कलिपुष्पा कलादाना कशिपुः क

श्यपार्च्चिता॥ ७०॥ कश्यपा कश्यपाराध्या कलिपूर्णकलेवरा॥

कलेवरकॅ...कंच कवर्गाच कराल का॥ करालभैरवाराध्या कराल

भैरवेश्वरी॥ कराला कलनाधारा कपर्दीशवरप्रदा॥ कपर्दीशप्रे

मलता कपर्दिमालिकायुता॥ कपर्दिजपमालाढ्या करवीरप्र

सूनदा॥ करवीरप्रियप्राणा करवीरप्रपूजिता॥ कर्णिकारसमा

रि० ७

16

कारा कर्णि कारप्रपूजिता ॥ ७९ ॥ करीषाग्निस्थिता कर्षकर्षमा
त्रस्वर्णदा ॥ कलशा कलशाराध्या कषाया करिगानदा ॥ कपि
ला कलकंठी च काली कल्पलतामता ॥ कल्पलता कल्पमाला क
ल्पकारी च कल्पभूः ॥ कर्पूरामोदरुचिरा कर्पूरामोदधारिणी ॥ क
र्पूरमालाभरणा कर्पूरवासपूर्त्तिदा ॥ कर्पूरमाला जपदा कर्पूरार्ण
वमध्यगा ॥ कर्पूरतर्पणरता कटकाम्बरधारिणी ॥ कपटेश्वरसं
पूज्या कपटेश्वररूपिणी ॥ कटुः कपिध्वजाराध्या कलापपु
ष्परूपिणी ॥ कलापपुष्परुचिरा कलापपुष्पपूजिता ॥ क्रकचा
क्रकचाराध्या कथंब्रूमा करालजा ॥ १८० ॥ कथंकारविनि
र्मुक्ता काली कालप्रिया क्रतुः ॥ कामिनी कामिनीपूज्या कामि

८ कपालाकर्णकरा कर्पूरचासनर्त्तिदा ॥

नीपुष्पधारिणी ॥१८१॥ कामिनीपुष्पनिलया कामिनीपुष्पपू
र्णिमा ॥ कामिनीपुष्पपूज्यार्त्ता कामिनीपुष्पभूषणा ॥ कामिनी
पुष्पतिलका कामिनीपुष्पचुंबना ॥ कामिनीयोगेसंतुष्टा कामिनी
योगभोगदा ॥ कामिनीकुंडसंमग्ना कामिनीकुंडमध्यगा ॥ का
मिनीमानसाराध्या कामिनीमानतोषिता ॥ कामिनीमानसंचा
रा कालिका कालकालिका ॥ कामा च कामदेवी च कामेशी काम
संभवा ॥ कामभावा कामरता कामार्त्ता काममंजरी ॥ काममंजी
ररणीता कामदेवप्रियांतरा ॥ कामकाली कामकला कालिका
कमलाभिधा ॥ कादिका ॥ मैला काली कालानलसमप्रभा ॥१
17

का॰

र्क।

८

कल्पांतरहना कांताकांतारप्रियवासिनी॥ कालपूज्या कालर
ताकालमालाच कालिनी॥ कालवीरा कालघोरा कालसिद्धा
च कालदा॥ कालांजन समाकारा कालिंजरनिवासिनी॥ का
लऋद्धिः कालवृद्धिः कालाग्रहविमोचनी॥ कादिविद्या कादि
माता कादिस्था कादिसुंदरी॥१९०॥ काशीकांचीचकांचीशा
काशीशवरदायिनी॥ क्रींबीजा चैव क्रींबीजहृदयायनम
स्मृता॥ काम्या काम्यगतिः काम्यसिद्धिदात्री च कामसूः॥ का
माक्षी कामरूपा च कामचापविमोचिनी॥ कामदेवकलारामा
कामदेवकलालया॥ कालरात्रिः कामदात्री कांताराच

त्नवासिनी॥ कालरूपा कालगतिः कामयोगपरायणा॥ कामसं
२का मर्द्दनरता कामगेहविनाशिनी॥ कालभैरवभार्या च कालभैरव
कामिनी॥ कालभैरवयोगस्था कालभैरवयोगदा॥ कामधेनुः
कामदोग्ध्री काममाता च कांतिदा॥ कामुका कामुकाराध्या
कामुकानंदवर्धिनी॥ कार्त्तवीर्या कार्तिकेया कार्तिकेयप्र
पूजिता॥ कार्यकारणदा कार्यकारिणी कारणांतरा॥ कांतिग
म्या कांतिमयी कांत्या कात्यायिनी च का॥ कामसारा च का
श्मीरा काश्मीराचारतत्परा॥ कामरूपाचाररता कामरूप
प्रियंवदा॥ कामरूपा कामसिद्धा कामकृपमनोमयी॥ को

18

तिकीकार्तिकाराध्याकांचनारप्रपूजिता॥कांचनारप्रसूनाभाकां
चनारप्रपूजिता॥२००॥काचरूपाकाचभूमिः कांस्यपात्रप्रभो
जिनी॥कांस्यध्वनिमयीकामसुंदरीकामचुंबना॥काशपुष्प
प्रतीकाशाकामद्रुमसमागमा॥कामपुष्पाकामभूमिः काम
पूज्याचकामदा॥कामदेहाकामगेहाकामबीजपरायणा॥का
मध्वजसमारूढाकामध्वजसमास्थिता॥काश्यपीकाश्य
पाराध्याकाश्यपानंददायिनी॥कालिंदीजलसंकाशाकालिं
दीजलपूजिता॥कादेवपूजानिरताकादेवपरमार्थदा॥क
र्मणाकर्मणाकाराकामकर्मणकारिणी॥कार्मणत्रोटनकरी

काकिनीकारणाह्वया॥ काव्यामृताच कालिंगा कालिंगमर्दनोद्यता॥
कालागरुविभूषाढ्या कालागरुविभूतिदा॥ कालागरुसुगंधा च कालागरुप्रतर्पणा॥ कावेरीनीरसंप्रीता कावेरीतीरवासिनी॥ २३
कालचक्रभ्रमाकारा कालचक्रनिवासिनी॥ कानना काननाधारा
कारुः कारुणिकामयी॥ कांपिल्लवासिनी काष्ठा कापिली कांचि
कामभूः॥ कादंबिनी पानरता तथा कादंबरीकला॥ कामबंधा च कामेशी कामराजप्रपूजिता॥ २०॥ कामराजेश्वरी विद्या कामकौतुककौमुदी॥ कांबोजजा कांक्षितदा काश्यपा कांचनकारिणी॥ कांचनाद्रिसमाकारा कांचनाद्रिप्रदानदा॥ कामकीर्तिः कार्तिके

19

श्रीकारिकाकांतराश्रया॥ कामभेदी च कामार्तिनाशिनी कामभूमिका॥
कालनिर्णाशिनी काव्यवनिता कायरूपिणी॥ काव्यस्था काव्यसंदी
प्तिः काव्यदा कालसुंदरी॥ काष्ठा श्रीकारणवराकुमारीपूजनोद्य
ता॥ कांचीनूपुरभूषाढ्या कुंकुमाभरणान्विता॥ कालचक्रा कालग
तिः कालचक्रमनोभवा॥ कुंजमध्या कुंदपुष्पा [illegible] कुंदपुष्प
प्रिया कुजा॥ कुजमाता कुजाराध्या कुठारवरधारिणी॥ कुंजरस्था
कुशरता कुशेशयविलोचना॥ कुनटी कुररी कुद्रा कुरंगी कुरंगजा
रुया॥ कुंभीनसविभूषा च कुंभीनसवधोद्यता॥ कुंभकर्णमनोल्ला=
सा कुलचूडामणी कुला॥ कुलालगृहकन्या च कुलचूडामणिप्रि

या॥कुलपूज्या कुलाराध्या कुलपूजापरायणा॥कुलभूषा त
था कुक्षिः कुररीगणसेविता॥कुलपुष्पा कुलरता कुलपुष्पपरा
यणा॥२०॥कुलवस्त्रा कुलाराध्या कुलकुंडसमप्रभा॥कुलकुं
डसमुल्लासा कुंडपुष्पपरायणा॥कुंडपुष्पप्रहसना कुंडगोलोद्भवा
त्मिका॥कुंडगोलोद्भवाधारा कुंडगोलमयी कुहूः॥कुंडगोलप्रि
यप्राणा कुंडगोलप्रपूजिता॥कुंडगोलमनोल्लासा कुंडगोल
२० वरप्रदा॥कुलदेवरता कुद्धा कुलसिद्धिकरीपरा॥कुलकुंडसमा
कारा कुलकुंडसमानभूः॥कुंडसिद्धिः कुंडऋद्धिः कुमारीपूज
ता॰ नोद्यतॉ॥कुमारीपूजकप्राणा कुमारीपूजकालया॥कुमारीका

ककाः कुमारीपूजनोत्सुका कुमारीव्रतसंतुष्टा ।

२०

मसंतुष्टा कुमारीरूपधारिणी ॥ कुमारीभोजनप्रीता कुलीराच कुमार
दा ॥ कुमारमाता कुलदा कुलयोनिः कुलेश्वरी ॥ कुललिंगा कुलोद्भवा नं २
कुलरम्या कुलकेधृक् ॥ कुंतीचकुलकांताच कुलमार्गपरायणा ॥ कु
ल्लाचकुरुकुल्लाचकुल्ला कुलकामदा ॥ कुलिशांगी कुब्जिकाचकु
ब्जिकानंदवर्धिनी ॥ कुलीना कुंजरगतिः कुंजरेश्वरगामिनी ॥ कुलपा
ली कुलवती तथैव कुलदीपिका ॥ ३० ॥ कुलयोगेश्वरी कुंडा कुंकुमा
रुणविग्रहा ॥ कुंकुमानंदसंतोषा कुंकुमार्णववासिनी ॥ कुंकुमाकुं
कुमप्रीता कुलभूः कुलसुंदरी ॥ कुमुद्वती कुमुदिनी कुशला कुल
टालया ॥ कुलटालापमध्यस्था कुलटासंगतोषिणी ॥ कुलटा २०

ककनाशाकृ धेली ३ ... कुशा कुश

तुंबनोद्यक्ता कुशावर्त्ता कुलार्णवा ॥ कुलार्णवाचाररता कुंडली कु

डलाकृतिः ॥ कुमारी च कुलश्रेष्ठा कुलचक्रपरायणा ॥ कुशलाकृ

तिरूपा च कुंतला कुंतलाकृतिः ॥ कूटस्था क्रूरदृष्टिश्च कूर्चबी

जधरा च कूः ॥ कूकूकूकू प्राष्टरता क्रूं क्रूं क्रूं क्रूं परायणा ॥ कूकूश

शब्दनिलया कुक्कुरालयवासिनी ॥ कुक्कुरासंगसंसक्ता कुक्कु

रानंतविग्रहा ॥ कूर्चारंभा कूर्चबीजा कूर्चजापपरायणा ॥ कुलि

नी कुलसंस्थाना कूर्चकुंठपरामतिः ॥ कूर्चबीजभालदेशा

कूर्चमस्तकभूषिता ॥ कुलवृक्षगता कूर्मा कूर्माचलनिवासि

नी ॥ कुलबिंदुः कुलशिवा कुलशक्तिपरायणा ॥ कुरविंदमणि

21

भरव्या कुंकुमद्रुमवासिनी॥ कुचमर्दनसंतुष्टा कुचजापपरायणा॥
कुचस्पर्शनसंतुष्टा कुचालिंगनहर्षदा॥ कुगतिघ्नी कुबेरार्च्या
कुतस्रः कुलना यिका॥ कुगायना कुर्चधारा कुगीता कुंदंदंतिका॥
कुगोरा कुतराभासा कुगोपा कुघ्नहारिका॥ कीर्तिः किरातिनी
क्लिन्ना किरणा किन्नरी क्रिया॥ क्रींकारी क्रींजपासक्ता क्रींहं
स्त्रीं मंत्ररूपिणी॥ कीर्मीरितदृशापांगा किशोरी च किरीटिनी॥
कीटभाषा कीटयोनिः कीरमाता च कीरदा॥ किंशुका कीरभाषा
च क्रियासारा क्रियावती॥ कींकीशब्दपरा क्लां क्लीं क्लूं क्लैं क्लौं मं
त्ररूपिणी॥ कांकींकूंकैंस्वरूपा च कः फट् मंत्रस्वरूपिणी॥ के

त्कीभूषणानंदा केतकाभरणान्विता ॥ केकराकेकिनीकेशी केशी
सूदनलत्परा ॥ केशरूपा केशमुक्ता कैकेयी कौशिकी तथा ॥ कैर
वी कैरवाह्लादा केसरा केलुरूपिणी ॥ केशाराराध्यहृदया केस
रासक्तमानसा ॥ क्लैव्यनिर्नाशिनी क्लैं बीजजपतोषिता ॥ कौशला

कैशलाक्षी च कोशा च कोमला तथा ॥ कोलापुरनिवासी च कौला
सुरविनाशिनी ॥ कोटरूपा कोटरता क्रोधिनी कोकरूपिणी ॥ ५० ॥
कोका च कोकिला कोटिः कोटिमंत्रपरायणा ॥ कोट्यैमंत्रयुता के
रूपा केरला श्रया ॥ केरलाचारनिपुणा केरलेंद्रगृहस्थिता ॥ ६८

क्लीं ४
ना ६
नं त ७
२२
क्लौं

ककाः

२२

केदाराश्रमसंस्था च केदारेश्वरपूजिता॥ क्रोधरूपा क्रोशपदा क्रोधमा
ता च कौशिकी॥ कोदंडधारिणी क्रौंचा कौशल्या कौलमार्गगा॥ कौ
लिनी कौलिकाराध्या कौलिकागारवासिनी॥ कौतुकी कौमुदी कौ
ला कौमारी कौरवार्चिता॥ कौंडिन्या कौशिली क्रोधज्वाला भासु
ररूपिणी॥ कोटिकालानलज्वाला कोटिमार्तंडविग्रहा॥ कृत्ति
का कृष्णवर्णा च कृष्णा कृत्या क्रियातुरा॥ कृशांगी कृतकृत्या च क्रः
फट् स्वाहास्वरूपिणी॥ २९६॥ क्रौं क्रौं हुं फट् मंत्रवर्णा क्रीं

तैं

नौं

ह्रीं हूं फट् नमः स्वधा॥ क्रीं क्रीं ह्रीं स्वधा हूं हूं फट् स्वाहा मंत्ररूपिणी॥
॥२९८॥ इति श्री सर्वसाम्राज्यमेधानाम सहस्रकं सुंदरीवरदानाख्यं स्व

ते

२२

सहस्रनाम समाप्तं॥

रूपाणिधमेवच ॥ कथितं दक्षिणाकाल्या स्कंद[illegible]वैनीतियो

गतः ॥ वरदानप्रसंगेन रहस्यमपि दर्शितं ॥ गोपनीयं सदा भक्त्या प

ठनीयं परात्परं ॥ प्रातर्मध्यान्हकाले च संध्याधरात्रयोरपि ॥ पूजा

काले जपांते च पठनीयं विशेषतः ॥ यः पठेत्साधकाधीशः कालीरू

पो हि वर्षतः ॥ पठेद्वा पाठयेद्वापी शृणोति श्रावयेदपि ॥ वाचकं तो

षयेद्वापि स भवेत्कालिकातनुः ॥ सहेत्लपा[illegible]कीलयाया यः

कश्चिन्मानवः [illegible]त् ॥ सर्वदुःखविनिर्मुक्तः त्रैलोक्यविजयी क

विः ॥ मृतवंध्या काकवंध्या कन्यावंध्या च वंध्यका ॥ पुष्पवंध्या स्र

त्कवंध्या शृणुयात्स्तोत्रमुत्तमं ॥ सर्वसिद्धिप्रदातारं स[illegible]त्कविंचिव

कृ०
२३

जीवनं॥ प[illegible]ऊतेद्र कीर्तियुतं लभते नात्रसंशयः॥ यंद्यं[illegible] काममुपाकृ
त्यकालींध्यात्वाजपेत्स्तवं॥ तंतंकामं करेकृत्वामंत्रीभवतिनान्यथा॥
योनिपुष्पोर्लिंगपुष्पैःकुंडगोलोद्भवैरपि॥ संयोगामृतपुष्पैश्चवस्त्रैर्दे
वीप्रसूनकैः॥ कालीपुष्पैःपीठतोयैः योनिक्षालनबिंदुभिः॥ कस्तूरी
कुंकुमैर्देवीनखकालागरुक्रमात्॥ अष्टगंधैर्धूपदीपैर्जपापावकसं
युतैः॥ रक्तचंदनसिंदूरैः मत्स्यमांसादिभूषकैः॥ मधुभिःपाय
सैःक्षीरैः शोभितैःशोणितैरपि॥ महोपचारैः[illegible]श्चनैवेद्यैः ष
ड्रसान्वितैः॥ पूजयित्वामहाकालीमहाकालेनलालितां॥ वि
द्याराज्ञीकुल्लुकांचजप्त्वास्तोत्रंपठे[illegible]च्छिवे॥ ७१॥ कालीभ

रुद्राक्षचित्तः सिंदूरतिलकान्वितः ॥ तांबूलपूरितमुखो मुक्तके
शो दिगंबरः ॥ शवयोनिस्थितो वीरः श्मशानसुरतान्वितः ॥ शू
न्यालये बिंदुपीठे पुष्पाकीर्णे शिवावने ॥ शयानो वाप्यभुंजानः
कालीदर्शनमाप्नुयात् ॥ तत्र यद्यत्कृतं कर्म तदनंतफलप्रदं ॥ ऐश्व
र्ये कमला साक्षात् सिद्धौ श्रीकालिकांबिका ॥ कवित्वे तारिणीतुल्यः
सौंदर्ये सुंदरीसमः ॥ वसोर्धारासमः काव्ये श्रुतौ श्रुतधरो यथा ॥ ब्रह्मा
गा० स्त्रवद्दुर्धर्षः त्रैलोक्यविजयस्त्रवत् ॥ शत्रुहर्त्ता कर्ष्यकर्त्ता भवेत् शिव
समः क्रतौ ॥ दिग्विदिक्चंद्रकर्त्ता च दिवारात्रिविपर्ययी ॥ महादेवस
२५ मो योगी त्रैलोक्यस्तंभकक्षणात् ॥ गानेन तुंबरुं साक्षाद्दानेकर्णी

कुका॰

२४

ना॥स मो भवेत्॥ गजाश्वरथपत्तीनां स्वाणामधिपः कृती॥ आयुष्ये तु भृशुंडी च जरापालितवर्जितः॥ वर्षे षोडशवान् भूमान् सर्वकालं महेश्वरि॥ ब्रह्मांडगोलके देवेशि न तस्य दुर्लभं क्वचित्॥ सर्वं हस्तगतं भूयात् नात्र कार्या विचारणा॥ कुलपुष्पयुतं दृष्ट्वा तत्र कालीं विचिंत्य च॥ विद्याराज्ञीं तु संस्पृश्य पठेन्नामसहस्रकं॥ मनोरथमयी सिद्धिस्तस्य हस्ते सदा भवेत्॥ परदारां समालिंग्य संचुंब्य परमेश्वरि॥ हस्ताहस्ति कयायोगं कृत्वा जप्त्वा स्तवं पठेत्॥ यो निवीस्य जपेत्स्तोत्रं कुबेरादधिको भवेत्॥ कुंडगोलोद्भवं गृह्य पर्णकं होमयेन्निशि॥ पितृभूमौ महेशानि विधिरेखां विमार्जयेत्॥ तक

२४

णीं चंचलां रम्यां सुंदरीं कामगर्वितां ॥ समानीय प्रयत्नेन संशोध्य न्या
सयोगतः ॥ प्रसूनमंचे संस्थाप्य पृथ्वी विकसितां चरेत् ॥ मूलचक्रं तु सं
भाव्य देव्यावरणसंयुतं ॥ संपूज्य परमेशानि सर्वत्वं तं महेश्वरी ॥ ज
प्त्वा स्तवं महेशानि द्राविणीं संस्मरेच्छिवे ॥ अष्टोत्तरशतं योनिं सं
मंत्र्य चुंब्य यत्नतः ॥ संयोगी भूय जप्तव्यं सर्वविद्याधिपो भवेत् ॥
शून्यागारे शिवारण्ये शिवदेवालये तथा ॥ शून्यदेशे तडागे च
गंगागर्भे चतुःपथे ॥ श्मशाने पर्वतप्रांते एकलिंगे शवे मुखे ॥
मुंडे योनौ ऋतुस्नाता गेहे वेश्यागृहे तथा ॥ कुट्टिनीगृहमं
ध्ये वा कदलीमंडपे सदा ॥ पठेत्सहस्रनामख्यं स्तोत्रं सर्वार्थ
सिद्धये ॥ अरण्ये शून्यदुर्गे च रणे शत्रुसमागमे ॥ कालिसं
२५

चिंस्यग्रजपेत्सठेन्नामसहस्रकं॥ सर्वसिद्धी रोभ्रया ह्यंछासिद्धिं स्व
संविंदति॥ मृदुचूडकयो योनिंत्वचिंबाकोमलेशिवे॥
विष्टरेशावस्त्रेवापुष्पेवस्त्रासनेपिवा॥ कालीसंचिंत्यग्रजपे
त्ततोनामसहस्रकं॥ पंचानंदपरोभूत्वापठित्वाकालिकास्तवं॥
मुक्तकेशोदिशावासोमैथुनीशयनस्थितः॥ जप्त्वाकालींपठे
त्स्तोत्रं खेचरीसिद्धिभाग्भवेत्॥ चुकुरंयोगमासाद्यशुक्रो
त्सारणमेवच॥ जप्त्वाश्रीदक्षिणाकालीं शक्तिपातशतंलभेत्॥
लतांस्पृशन् जपन्चापिरमन्वैचिंतयन्जपि॥ आलोकयंदिशा
वासांपरशक्तिंविशेषतः॥ स्मृत्वा श्रीदक्षिणाकालीयोनिंच

राम

करगां चरेत्॥ पठेन्नाम सहस्रं यः शिवाद्प्याधिको भवेत्॥ लतारते
षु जप्तव्यं स्तुत्वा कालीं निराकुलः॥ दृशावधानो भवति मास मात्रेण सा
धकः॥ कालरात्र्यां महारात्र्यां वीररात्र्यामपि प्रिये॥ मोहरात्र्यां चतु
र्दश्यामष्टम्यां संक्रमेपि च॥ कुहूपूर्णेन्दु शुक्रेषु भौमावास्यां निशामु
खे॥ नवम्यां मंगलदिने तथा कुलातिथौ शिवे॥ कुलऋक्षे यत्ने प्र
न पठेन्नाम सहस्रकं॥ सुदर्शनो भवेद्दा शुक्रिन्नरी सिद्धिमा
ग्भवेत्॥ पश्चिमाभिमुखं लिंगं वृषशून्यं पुरातनं॥ तत्र स्थित्वा
जपेत्स्तोत्रं सर्वकामाप्तये शिवे॥ भौमवारे निशीथे च अमावा
स्या दिने शुभे॥ माषभक्त बलिं छागं कृशरान्नं च पायसं॥ दध

26

क का

२६

मीनंशोणितंचदधिदुग्धंगुडार्द्रकं॥ बलिंदत्वाजपेन्मंत्रं चाष्टोत्तरसहस्रकं॥ देवगंधर्वसिद्धौघैः सेवितःस्मरसुंदरी॥ लभेद्देवेशीमासेन तस्यचासन्नसंहतिः॥ हस्तत्रयंभवेदूर्ध्वंनात्रकार्याविचारणा॥ हेलयात्कीलयाभ्यस्यकालीस्तौतिनरस्त्वयः॥ ब्रह्मा दीस्तंभयेद्देवी माहेशीमोहयेत्क्षणात्॥ आकर्षयेन्महाविद्यांदशपूर्वांत्रियाममतः॥ नवीनविष्णुनिर्माणंयमादीनांलुभारणं॥ ३०९॥ बलमुच्चाटयेन्नूनंसृष्टिंचन्नूलनांचरेत्॥ मेषमाहिषमार्जाररक्षा रवगंनरारेधिकैः॥ खड्गश्करकापोतै .... छिद्भिः शशकैः फलैः॥ शोणितैः सा स्थिमांसैश्चकारणैर्दुग्धपायसैः॥

२४

३

२६

कादंबरी सीधुमद्यैः सुरारिष्टैश्च सासवैः॥ योनिक्षालननीरैश्च
योनिलिंगामृतेन च॥ स्वजातकुसुमैः पूज्य जपांते तर्पयेच्छिवां॥
सर्वसाम्राज्यनाम्नस्तु स्तुत्वा नत्वा स्वशक्तितः॥ शक्त्यालापे पठेत्स्तो
त्रं कालीरूपो दिनत्रयात्॥ दक्षिणा कालिका तस्य गेहे तिष्ठति नित्यशः
॥ वेश्यालतागृहे गत्वा तस्याश्चुंबनतत्परः॥ तस्या योनौ मुखं द
त्वा तद्रसं विलिहन् जपेत्॥९५॥ तदंते नामसाहस्रं पठेद्भुक्तिपरा
यणः॥ कालिकादर्शनं तस्य भवत्येव त्रियामतः॥ नृत्यपात्रगृहे ग
त्वा मकारपंचकान्वितः॥ प्रसून मंचे संस्थाप्य शक्तिं न्यासपराय
णः॥ पात्रासादनकं कृत्वा दिग्वस्त्रां तां समाचरेत्॥ चक्रं तन्मू के

२७

अभ्यासेऽजयतन्त्रत्वस्यादमद्यमठत्॥ ८

संभाव्य तत्र सावरणां यजेत्॥ शतं भाले शतं केशे शतं सिंदूरमंडले॥ शत
द्वयं कुचद्वंद्वे शतं नाभौ महेश्वरि॥ शतं योनौ महेशानि उत्स्या यच
शतत्रयं॥ जपेत्तत्र महेशानि तदन्ते प्रैठेत्स्तुतिं॥ शलावधानोभ प ३
वति मासमात्रेण साधकः॥ मातंगिनीसमानीय किंवा कापालिकां
शिवे॥ दंतमाला जपे कार्या गले धार्या नृमुंडजा॥ नेत्रपद्मे यो
निचक्रं शक्तिचक्रं स्वचक्रके॥ कृत्वा जपेन्महेशानि मुंडपंचं प्रपूजयेत्॥ मु
मुंडासनस्थितो वीरो मकारपंचकान्वितः॥ अन्यामालिंग्य प्रज
पेत् अन्यां संचुंब्य वै पठेत्॥ अन्ययोनौ शिवं दत्वा पुनः पूर्ववदा
चरेत्॥ अवधानसहस्रेषु शाक्तिपालपालेषु च॥ राजा भवति देवे

शिमासपंचकयोगतः॥ यवनीशक्तिमानीय ग॥ नशक्तिपरायणा॥
कुलाचारक्रमेणैव तस्यायो निविकाशयेत्॥ तत्र जिह्वां प्रदत्वा
तु जपेन्नामसहस्रकं॥ नृकपाले तत्र दीपं लाप्ययत्नेन वै जपे
त्॥ महाकविवरो भूयान्नात्र कार्याविचारणा॥ कामार्तांशक्ति
मानीय योनौ तु मल चक्रकं॥ विलिख्य परमेशानि तत्र मं
त्रं लिखेच्छिवे॥ तल्लिङ्गं जपेद्देवि सर्वशास्त्रार्थतत्त्ववित्॥
अश्रुतान्यपि शास्त्राणि वेदादीन्पाठयेत् ध्रुवं॥ विनाभ्यासेर्वि
नायासैः विना पाठादिभिप्रिये॥ चतुर्वेदाधिपो [illegible] क्ता [illegible] याद
लङ्गा त्रिवर्षतः॥ चतुर्विधं तु पाण्डित्यं तस्य हस्तगतं क्षणात्॥
24

शिवावलिः प्रदातव्यः सर्वदाश्मशानमंडले ॥ कालीध्यानं मंत्रं
चिंतानीलसाधनमेव च ॥ सहस्रनामपाठश्च कालीनामप्रकी
र्तनं ॥ भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः ॥ वीरसाधन
कं कर्म शिवापूजा बलिस्तथा ॥ सिंदूरतिलको देवि वेश्यालापो
निरंतरं ॥ वेश्यागृहे निशाचारो रात्रौ पर्यटनं तथा ॥ शक्तिप
जायोनिदृष्टिः खड्गहस्तो दिगंबरः ॥ मुक्तकेशो वीरवेषी तां
बूलपूरिताननः ॥ कालीभक्तो भवेद्देवि नान्यथा क्षोभमा
प्नुयात् ॥ दुग्धास्वादो योनिलेही संविदासव[illegible]र्पितः ॥ वेश्या घू
र्णा समा योगी [illegible] ॥ वेश्या देहसमा

॥ [illegible] ॥

चक्रे।

योगात् कालीं समः स्वयं॥ वेश्यामध्यगतं वीरं कदापश्याभि

साधकं॥ एवं वदति सा काली तस्माद्वेश्या वरा मता॥ वेश्या

कन्या लथा पीठ जालि भेद कुलक्रमात्॥ ४०॥ अकुल

क्रम भेदेन ज्ञात्वा चैव कुमारिकां॥ कुमारी पूजये इत्युक्त्या जपां

ते देव वत्पिये॥ पठे न्नाम सहस्त्रं यः कालीदर्शनभाग्भवेत्॥

भक्त्या पूज्य कुमारीं तु वेश्यां कुलसमुद्भवां॥ वस्त्र हेमादिभि

स्तोष्य जप्त्वा स्तोत्रं पठेत् शिवे॥ त्रैलोक्य विजयी भूयात् दमाच

रुप्र दर्शकः॥ यद्यद्दत्तं कुमार्यै तु तदनंत फलं भवेत्। कुमारी

29

क का॰

२९

पूजनफलं मयावक्तुं नशक्यते॥ चांचल्याद्दितं किंचितक्षम्य
तामयमंजलिः॥ एकांच पूजिताबालाद्वितीयं पूजितंम
वेत्॥ ३४५॥ कुमार्यश्चशक्त यस्य सर्वमितच्चराचरं॥ शाद्य
मानीयसद्रोत्रे न्यासजालं प्रविन्यसेत्॥ स्ववामभागे संस्था
प्य पठेनामसहस्रकं॥ सर्वा सिद्धीश्वरोभूयाभानकार्याविचा
रणा॥ श्मशानस्थोभवे स्वस्थोगलितांचिकुरंचरेत्॥ दिगंबरं
सहस्रांच सूर्यपुष्पं समानयेत्॥ स्ववीर्येणं तं कृत्वा प्रत्येकं प्रज
ने॥ पनुं ॥ पूज्यध्यात्वा महाभक्त्या समापाको नरः पठन्॥

णा॰ ७
२९

नखं केशांस्त्र वीर्यं च यद्यत्समार्जनी गतं॥ मुक्तकेशो दिशावासो मूलमंत्र
पुरःसरः॥ कुजवारे मध्यरात्रे होमं कुर्याच्छ्मशानके॥ पठेन्नामसहस्रं
यः पृथ्वीशाकर्षणं चरेत्॥ पुष्पयुक्ते भगे देवि संयोगानंदतत्परः॥
पुनश्चिकुरमासाद्य मूलमंत्रजपे शिवे॥ चिताव होममध्यरात्रे वीर्यमु छि४
त्सार्य यत्नतः॥ कात्तिकां पूजयन् तत्र पठेन्नामसहस्रकं॥ पृथ्वीशा
कर्षणं कुर्यात्तिनात्र कार्या विचारणा॥ कदलीवनमासाद्य लक्षमात्रं ज
पेन्नरः॥ मधुमत्यास्वयं देव्या सेव्यमानः स्मरोपमः॥ श्रीमधुमती
सुलक्ता तथा स्थावरजंगमं॥ कर्षणीति समुच्चार्य ठं स्वाहा समुच्चरेत्॥
त्रैलोक्याकर्षणी विद्या तस्य हस्ते सदा भवेत्॥ नदीपुरीवरस्त्वानि
क्रीं०

30

केको॰

२०

२ पं॰

हेमस्त्रीशैलभून्महान्॥ आकर्षयस्वं बुनिधेः सुमेरोश्च दिगंततः॥
अलभ्यानि च वस्तूनि रौद्रभितलादपि॥ वृत्तांतं च पुरस्त्रीणां रह
स्यं विद्विषामपि॥ राज्ञां च कथय स्वेषां सत्वं सत्वरमादिशेत्॥
द्वितीयवर्षपाठेन भवेत् पद्मावतीपतिः॥ ॐ ह्रीं पद्मावती फट् तत
स्त्रैलोक्यनामकं च॥ वार्त्तां च कथयद्वंद्वं स्वाहांतो मंत्र ईरितः॥ ब्र
ह्म विष्ण्वादिकानां च त्रैलोक्ये यादृशी भवेत्॥ सर्वं वदाति देवेशि
त्रिकालज्ञः कविः शुभः॥ त्रिवर्षपाठतो देवि लभेद्भोगवतीकलां॥
माता कालेन दृष्टोपि पिता धूमगतोपिवा॥ तस्य दर्शनमात्रेण

३०

चिरंजीवी नरो भवेत्॥ मृतसंजीवनी सुक्तामृतमुत्थापय

हृयं॥ ६२॥ स्वाहांतो मनुराख्यातः स्वप्नसिद्धि र्भवेत्ततः॥ ॐ ह्रीं स्वप्न वाराही कालीस्वप्ने कथय चोद्धरेत्॥ अमुकस्यामुकं देहि क्रीं स्वाहां तो मनुर्मतः॥ स्वप्नसिद्धा चतुर्वर्षात्तस्य स्वप्ने सदा स्थिता॥ चतुर्व र्षस्य पाठेन चतुर्वेदाधिपो नरः॥ तद्वस्त्रं जलसंयोगात् वृक्षाः काव्यं करोति च॥ तस्य वाक्य परिष्वंगात् भीतिर्वदति काव्यतां॥ मत्त रे तु करं दत्वा वदवाणीमिति ब्रुवन्॥ साधको वांछया कुर्वन् तत्तथै व भविष्यति॥ ब्रह्मांड गोलके याचर्या का विज्ञ गती तले॥ सम स्ताः सिद्धयो देवि करामलकवद्भवेत्॥ साधक स्मृति मात्रेणया

भारती

31

वंश: संति सिद्धय:॥२८०॥ स्वयमायांति पुरतोऽल्पादीनां तु का कथा॥
विदेशवर्त्तिनोऽभ्यासावर्त्तते चेटका इव॥ अमायां चंद्रदर्शश्च चंद्र
ग्रहणमेव च॥ अष्टम्यां पूर्णचंद्रत्वं चंद्रसूर्याष्टकं तथा॥ अष्टदि
क्षु तथा चाष्टौ करोत्येव महेश्वरि॥ अणिमा खेचरत्वं च चराचरपु
रीगति:॥ पादुका खड्ग वेताल यक्षिणी गुह्यकादय:॥ तिलको
गुप्तता कुर्याच्चराचरकथानकं॥ मृतसंजीवनी सिद्धिर्गुटिकाचर
सायनं॥ उड्डानसिद्धिर्वैशीषट्सिद्धीश्वरत्वकं॥ तस्य हस्ते भवे
द्देवि नात्र कार्या विचारणा॥ केतौ वा दुंदुभौ वस्त्रे विताने वि
ष्टने गृहे॥ मित्तो चवफल के पीठे त्ले खंच्य पूर्ज प्रयत्नत:॥ मध्ये

चक्रे दशांगोक्तं परितो नामत्सेवनं ॥ तद्धारणान्महेशानि त्रैलोक्य-
विजयी भवेत् । एको हि शतसंदर्शी लोकानां भवति ध्रुवं ॥ कल
शं स्थाप्य यत्नेन नाम साहस्रकं पठेत् । एको हि शत साहस्रानि
र्जित्यि चरणाजिरे । पुनरायाति च सुखं स्वगृहं प्रति पार्वती ॥
सेकः कार्यो महेशानि सर्वापत्ति निवारणः ॥ लभेत ग्रहादीनां
राक्षसं ब्रह्मराक्षसां भैरवेतालानां भैरवाणां स्कंदवैनायिकादिकान् ॥
नाशये त्क्षण मात्रेण नात्र कार्या विचारणा ॥ भस्माभिमंत्रितं कृ
त्वा ग्रहग्रस्तै विलेपयेत् । भस्म संलेपनादेव सर्वग्रहनिवारणं ।
नवनीतं चाभिमंत्र्य स्त्रीणां दद्यान्महेश्वरी ॥ वंध्या पुत्रप्रदं देवि

नात्र कार्य विचारण॥ कंठे वा वाम बाहौ वा योनौ वा धारणाच्छिवे॥ बहु पुत्रवती नारी सुभगा जायते ध्रुवं॥ पुरुषो दक्षिणांगे च धारयेत्स र्वसिद्धये॥ कंठे बाहौ च शिरसि हृदये नाभिगोचरे॥ कटि स्थाने शिखायां च धारयेत्सर्वसिद्धये॥ बलवान् कीर्तिमान् धन्यो धार्मिकः साधकः कृती॥ बहु पुत्र रथानां च गजानामधिपः सुखी॥ कामिनी कर्षणोद्युक्तः क्रीं च दक्षिण कालिके॥ क्रीं स्वाहा प्रजपेन्मंत्रमयुतं नाम पाठकः॥ आकर्षणं चरेद्देवि जले खेचर भूगतां॥ वशीकरण कामो हि हूं हूं ह्रीं ह्रीं च दक्षिणे॥ कालिके पूर्व बीजानि पूर्ववत्प्रजपन्पठेत्॥ उर्वशीमपि वशः येन्नात्र कार्य विचारणा॥ क्रीं दक्षिणका

सर्वसाधनयोग्याय शाक्ति आत्मपराय ॥ ७

लिके-ाति स्वाहासुतं जपेन्नरः ॥ पठेन्नामसहस्रं च त्रैलोक्यं मारयेत् ध्रु
वं ॥ देयं सहस्रनामाख्यं स्वयं काल्या प्रकाशितं ॥ वैष्णवाय विशुद्धाय शि
वाबालिरलाय च ॥ सत्पुत्राय प्रदातव्यं विद्याराज्ञी प्रवेदिने ॥ सुकिनीना

प्रपन्नाः पशांताय दाताया त्रिगुणाय च ॥ सत्पुत्राय प्रदातव्यं विद्याराज्ञी ॥ भक्ता

य ज्येष्ठपुत्राय गुरुभक्तिपराय च ॥ भक्तभक्ताय योग्याय शाक्तिभक्ति
पराय च । वेश्यापूजनयुक्ताय कुमारीपूजकाय च ॥ दुर्गाभक्ता-ाय शै
वाय महाकाल प्रजापिने ॥ अद्वैतभावयुक्ताय कालीभक्तिपराय च ।
॥ ९७ ॥ गुरुदैवतमंत्राणां महेशस्यापि पार्वती ॥ अभेदेन स्मरेन्मंत्री
सशिवः सचगाणपः ॥ स शाक्तो वैष्णवः सौर स एव पूर्वदीक्षितः ॥

३३

अयोग्याय न दातव्यं सिद्धिरोधः प्रजायते॥ वेश्यास्त्रीनिंदकायाथ स्रु
रासेविने निंदके॥ सुरासुखीमनुं स्मृत्वा सुरां त्वावत्त रिष्यति॥ वाग्वृत्ता
घोरे आः सः परम घोरे चतुरं वदेत्॥ ३९॥ घोररूपे हस्थ्य घोरमुखी भी
म पदं वदेत्॥ भीषण्य मुखषष्ठ्यं तहेतु वर्मयुगं पिवा॥ शिवं वन्हि
युगास्त्रं चतुर्हूं ः फट् चमनुर्भवेत्॥ एतस्य स्मरणाद्देवि दुष्टानां च
मुखे स्फुरा॥ ४०॥ अवतीर्णा भवेद्देवि नात्र कार्या विचारणा॥ खलाय
परतंत्राय परनिंदापराय च॥ भ्रष्टाय दुष्ट सत्वाय परिवादपराय च॥
शिवभक्ताय दुष्टाय परदारपराय च॥ न स्तोत्रं दर्शयेद्देवि शिवहत्या

कालिकानंदहृदयः कालिकासक्तमानसः॥ कालीभक्तो भवेत्सोऽपि
धन्यरूपः स एव तु॥ क्लौं काली क्लौं काली क्लौं काली तु केवला॥ क्लौं काली क्लौं काली क्लौं काली वरप्रदा॥ ६॥ बिल्वपत्रसहस्राणि करवीराणि वै तथा॥ प्रतिनाम्ना पूजयेद्धि तेन काली वरप्रदा॥ कमलानां सहस्रं च प्रतिनाम्ना समर्पयेत्॥ चक्रं संपूज्य देवेशि कालिका वरमाप्नुयात्॥ मंत्रक्षोभयुते देवि कुलशास्त्रजलेन च॥ नाम्ना प्रसेचये द्देवि सर्वक्षोभविनाशकृत्॥ तथा मेदेन कं देवि सहस्रमाहरेद्व्रती॥ सहस्रनाम्ना संपूज्य कालीवरमवाप्नुयात्॥ नवं विलिख्य रेहस्यं धारये कालिकां तनुः॥ कालीनि

35

 नासाद्धु भवतिन। ५

वेदितं यद्यत्तद्देशं भक्षयेच्छिवे॥ दीष्यदेह धरोभूत्वा कालीदेह स्थितो भवेत्॥ नैवेद्यनिंदकान् दुष्टान् हृष्ठान् स्पंति भैरवाः॥ योगिन्यश्च महावीरा रक्त पानोद्यताः सदा॥ मांसास्थि चर्वणोद्युक्ताभक्षयंति न संशयः॥ तस्मान्न निंदेन्मनसा कर्मणा वचसा क्वचित्॥ अन्यथा कुरुते यस्तस्य पातो भविष्यति॥ क्रमदीक्षाविहीनो न्यथा॥ मंत्र क्षोभश्च वा भूयाल्लक्ष्मीणाए र्वा भवेत् ध्रुवं॥ पुत्रहारी च स्त्रीहा श्रीराज्यहारी भवेत ध्रुवं॥ क्रमदीक्षायुतो देवि क्रमाज्ञाज्यमवाप्नुयात्॥ एकवारं पठे द्देवि सर्वपापविनाशनं॥ १५॥ द्विवारं प्रपठे द्यो .. हि वांछां विंदति निसधाः॥ त्रिवारं प्रपठेद्यस्तु वागीशासमतां व्रजेत्॥ चतुर्वारं पठेद्देवि

चतुर्वर्णाधिपो भवेत्॥ पंच वारं पठेद्देवि पंचकामाधिको भवेत्॥ षट् वारं प्रपठेद्देवि षडैश्वर्यमयो भवेत्॥ सप्तवारं पठेद्देवि कार्मनाँति तं लभेत्॥ सिं २ व[illegible]सु वारं पठेद्देवि [illegible]वागीशो भवति ध्रुवं॥ नव वारं पठेद्देवि नवनाथसमो भवेत्॥ दश वारं कीर्त्तयेद्यो हि शार्ङ्गः खचरेश्वरः॥ विंशद्वारं कीर्त्तयेद्यः सर्वैश्वर्यमयो भवेत्॥ पंचविंशति वारैस्तु सर्वचिंतानिवारकः॥ पंचाशद्वारमावृत्त्य पंचभूतेश्वरो भवेत्॥ शतवारं कीर्त्तयेद्यः शतानंद समो नधीः॥ शतपंचकमावृत्त्या राजराजेश्वरः कलौ॥ सहस्त्रावर्त्तना[illegible]द्देवि लक्ष्मीमावृ[illegible]णुते स्वयं॥ त्रिसहस्त्रं समावृत्त्य त्रिनेत्रसदृशः कृतिः॥ पंच सहस्त्रावर्त्तनात्तु कामकोटिविमोहनः॥ दश सह

३८

क॰का॰

२५

स्नावर्त्तनात्तु भवेत्दशमुखेश्वरः॥२४॥ पंचविंशत्सहस्रेण चतुर्विंशतिसिद्धिभाक्॥ लक्षावर्तनमात्रेण लक्ष्मीपतिसमोभवेत्॥२५॥ लक्षत्रयावर्त्तनोत्तु महादेवं विजेष्यति॥ लक्षपंचकमावर्त्यकालपंचकसंयुतः॥२६॥ दशलक्षावर्त्तनात्तु दशविद्यासिकृत्तमा॥ पंचविंशतिलक्षैस्तु दशविद्येश्वरो भवेत्॥ पंचाशल्लक्षमावृत्य महाकालसमोभवेत्॥ कोटिमावर्त्त ... येद्योहि कालीपश्यतिचक्षुषा॥ वरदानोद्यतं परां माहाकालसमन्वितां॥ प्रत्यक्षं पश्यति शिवे तस्य देहे वसेत्ध्रुवं॥२९॥ श्रीविद्याकालिकातारा त्रिशक्तिविषयेपठेत्॥ त्रिशक्तिविषयो देवि क्रमदीक्षाप्रकीर्तिता॥३०॥ क्रमदीक्षायुतो

२५

देवि राजा भवति निश्चितं॥ विधेर्लिपिंतु संमार्ज किंकरत्वं विसृज्य च॥
महाराज्यमवाप्नोति नात्र कार्या विचारणा॥ क्रमदीक्षाविहीनस्य
फलं पूर्वं मयेरितं॥ क्रमदीक्षायुतो देवि शिव एव न चापरः॥ क्रम
दीक्षासमायुक्तः कल्यो कः सिद्धिभाग भवेत्॥ क्रमदीक्षाविही
नस्य सिद्धिहानिः पदे पदे॥ अहो धन्यवतां मध्ये धन्यः क्रमयु
तः कलौ॥ तत्रापि धन्यो देवि पि नामसाहस्त्रपाठकः॥ देशका
ल विधो देवि स्तोत्रमेतत् सदा पठेत्॥ सिद्धिं विंदति देवेशि ना
त्र कार्या विचारणा॥ कलौ काली महाविद्या कलौ कालीतु सिद्धि

36

क का ·
३८

दा॥३८॥ कलौ काली सिधिदा च कलौ काली वरप्रदा॥ कलौ काली
गौर साधकाँ दर्शनार्थं समुद्यता॥ कलौ काली केवल स्या नात्र कार्या
विचारणा॥ नान्यविद्या नान्यविद्या नान्यविद्या कलौ भवेत्॥
हा कलौ कली विंहाय यः कश्चि सिधिकामुकः॥ स तु शक्तिं विना
देवि रतिसंभोग मिछति॥ कलौ कालीं विना देवि यः कश्चित्
काव्यमिछति॥ स नील साधनं त्यक्ता परिभ्रमति सर्वतः॥
कलौ कालीं विहाया थ यः कश्चिन्मोक्षमिछति॥ गुरुध्या ३८
नं परित्यज्य सिधिमिछति साधकः॥४१॥ कलौ कालीं वि

हायाथयः कश्चिद्राज्यमिच्छति ॥ सभोज्यंच परित्यज्य क्षनिवृत्ति
मभीप्सति ॥ सधन्यः सचवि ज्ञानी स एव स्मर पूजितः ॥ स
दीक्षितः स्मरवी साधुः सत्यवादी जितेंद्रियः ॥ सवेदव स्मास्वा
ध्यायी सर्वानंद परायणः ॥ स्व स्मिन्काली तु संभाव्य पूज
येज्ज गदंबिकां ॥ त्रैलोक्य विजयी भूयात्तात्र कार्या विचा
रणा ॥ गुरुरूपं शिवं ध्यात्वा शिवरूपं गुरुं स्मरेत् ॥ सदाशि
वः स एव स्यात्तात्र कार्या विचारणा ॥ गोपनीयं गोपनी
यं गोपनीयं प्रयत्नतः ॥ रहस्याति रहस्यं च रहस्याति

37

पाठार्धं वा तदर्धं वा नामार्धं वा पठेद्देवि।

रहस्यकं॥ श्लोकार्धपादमात्रं वा नवधा दिवसं चरेत्॥ पुस्तकं पूजयेत्

भक्त्या स्वावृत्तिफलसिद्धये॥ न च मारीभयं तत्र न चाग्निवाल

सम्भवः॥ न भूतादिभयं तत्र सर्वत्र सुखमेधते॥ कुंकुमाल

क्तकेनैव रोचनागुरुयोगतः॥ भूर्जपत्रे लिखेत्पुण्यं सर्वमा

र्थसिद्धये॥ इति गदितमशेषं कालिकावर्णरूपं प्रपठति य

दि भक्त्या सर्वसिद्धीश्वरः स्यात्॥ ५०॥ अभिनवसुखकामं

सर्वविद्याभिरामं भवति सकलसिद्धि सर्ववी[illegible]रासमाधिः॥

इति संक्षेपतः प्रोक्तमकथ्यं तु महेश्वरि॥ ५२॥ इति

श्रीमदादिनाथविरचितायां महाकालसंहितायां कालीकालसंवादे सुंदरीवरदानाख्यं कार्तसहस्रनामस्तोत्रं संपूर्णं ॥

श्रीमदानिशंकरार्पणमस्तु ॥ शुभंभूयात् ॥ शके १७६२ शार्वरीनामसंवत्सरे दक्षिणायने वर्षाकर्तौ भाद्रपदमासे शुक्लपक्षे भौमवासरे तद्दिने समाप्तं ॥ श्रीवामनगुरुभ्योनमः

३८

॥ इति ककारादिसहस्रनामसमाप्तं ॥

39